National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(60): 84-89
© 2025 NJHSR
www.sanskritarticle.com

# अङ्कुरो जायते इत्यत्र- भर्तृहरिदिशा कर्तृत्वविमर्शः

**सजनगुहः**

**सजनगुहः**
(जे.आर.एफ) शोधार्थी,
संस्कृतविभागः, रायगञ्जविश्वविद्यालयः,
पश्चिमबङ्गः

**Abstract-**
वाक्यपदीये पदकाण्डे साधनसमुद्देशे भर्तृहरिणा कर्तृस्वातन्त्र्यविषये हेतुषटकं निरटङ्कि। करणादिप्रवृत्तेः प्रागेव प्रधानक्रियासिद्धौ शक्तेरर्जनमिति प्रथमहेतुः। स्वायत्तव्यापारेण करणादीनां न्यग्भावापादनमिति कर्तुः स्वातन्त्र्यविषये द्वितीयहेतुः। क्रियासिद्धौ करणादीनां स्वस्याधीने प्रवर्तनमिति कर्तुः स्वातन्त्र्ये तृतीयहेतुः। तथा च प्रवृत्तानां निवर्तनमिति चतुर्थहेतुः। करणादीनां प्रतिनिधिसद्भावेऽपि स्वप्रतिनिधेरदर्शनञ्च कर्तुः स्वैरिणि पञ्चमहेतुः। अपि च कारकान्तराणामभावे स्वस्य दर्शनमिति तस्य स्वातन्त्र्ये षष्ठहेतुः। विवक्षावशात् शब्दमात्रगम्यमाने कर्तृत्वे स्वीकृते चेतनवस्तुवदचेतने वस्तुनि यथा हेतुषटकैः कर्तृत्वं स्यात्तथा वस्तुसत्तमतिक्रम्य अविद्यमाने वस्तुन्यपि कर्तृत्वं जायते इति भर्तृहरेः सिद्धान्तः। अतः कर्ता मुख्यतो द्विविधः। मुख्यगौणश्च भेदेन। रामो गच्छतीत्यत्र रामो मुख्यश्चेतनत्वात्। गौणस्तु स्थाली पचतीति। उदाहरणद्वये कर्त्रोर्वस्तुसत्तमस्ति। परन्तु अविद्यमाने वस्तुनि कर्तृत्वप्रमाणाय भर्तृहरिणा उदाहारि यदङ्कुरो जायते इति। अत्र तात्पर्यो वर्तते यथा-विवक्षोपलब्धे शब्दमाहात्म्ये च कर्तृत्वलाभे सति उत्पत्तेः प्राग् बहिरसतोऽपि पदार्थस्य कर्तृत्वं समुपजायते। एवं सदसदवस्तुभेदेनापि कर्तृत्वं युक्तम्। अत्र कारणं भवति बुद्धिः। अन्यथा वास्तवरूपमङ्गीकृत्य कर्तृत्वेऽभ्युपगमे सदसत्पक्षभेदेनापि कर्तृत्वं नोपजायते। अतोऽङ्कुरो जायते इत्यत्राङ्कुरस्य कर्तृत्वं सद्भूत्वा भवति असद्भूत्वा वेति शङ्कासमाधाने स्वनैपुण्यं प्रतिस्थापनाय भर्तृहरिणा बहुधा व्यरचि। अतोऽवसरोऽयं तन्मतमनुचिन्त्य शङ्कासमाधाने।

**Key Words-** स्वतन्त्रः, कर्ता, अङ्कुरः, वस्तुदिशा कर्तृत्वम्, जातिदिशा कर्तृत्वम्, विवर्तवाददिशा कर्तृत्वम्।

**अङ्कुरो जायते इत्यत्र- भर्तृहरिदिशा कर्तृत्वविमर्शः**

**Introduction-**

वाक्यपदीये पदकाण्डे साधनसमुद्देशे भर्तृहरिणा कर्तृस्वातन्त्र्यविषये हेतुषटकं निरटङ्कि। करणादिप्रवृत्तेः प्रागेव प्रधानक्रियासिद्धौ शक्तेरर्जनमिति प्रथमहेतुः। स्वायत्तव्यापारेण करणादीनां न्यग्भावापादनमिति कर्तुः स्वातन्त्र्यविषये द्वितीयहेतुः। क्रियासिद्धौ करणादीनां स्वस्याधीने प्रवर्तनमिति कर्तुः स्वातन्त्र्ये तृतीयहेतुः। तथा च प्रवृत्तानां निवर्तनमिति चतुर्थहेतुः। करणादीनां प्रतिनिधिसद्भावेऽपि स्वप्रतिनिधेरदर्शनञ्च कर्तुः स्वैरिणि पञ्चमहेतुः। अपि च कारकान्तराणामभावे स्वस्य दर्शनमिति तस्य स्वातन्त्र्ये षष्ठहेतुः। विवक्षावशात् शब्दमात्रगम्यमाने कर्तृत्वे स्वीकृते चेतनवस्तुवदचेतने वस्तुनि यथा हेतुषटकैः कर्तृत्वं स्यात्तथा वस्तुसत्तमतिक्रम्य अविद्यमाने वस्तुन्यपि कर्तृत्वं जायते इति भर्तृहरेः सिद्धान्तः। अतः कर्ता मुख्यतो द्विविधः। मुख्यगौणश्च भेदेन। रामो गच्छतीत्यत्र रामो मुख्यश्चेतनत्वात्। गौणस्तु स्थाली पचतीति। उदाहरणद्वये कर्त्रोर्वस्तुसत्तमस्ति। परन्तु अविद्यमाने वस्तुनि कर्तृत्वप्रमाणाय भर्तृहरिणा उदाहारि यदङ्कुरो जायते इति। अत्र तात्पर्यो वर्तते यथा-विवक्षोपलब्धे शब्दमाहात्म्ये च कर्तृत्वलाभे सति उत्पत्तेः प्राग् बहिरसतोऽपि पदार्थस्य कर्तृत्वं समुपजायते। एवं सदसदवस्तुभेदेनापि कर्तृत्वं युक्तम्। अत्र कारणं भवति बुद्धिः। अन्यथा वास्तवरूपमङ्गीकृत्य कर्तृत्वेऽभ्युपगमे सदसत्पक्षभेदेनापि कर्तृत्वं नोपजायते। अतोऽङ्कुरो जायते इत्यत्राङ्कुरस्य कर्तृत्वं सद्भूत्वा भवति

**Correspondence:**
**सजनगुहः**
(जे.आर.एफ) शोधार्थी,
संस्कृतविभागः, रायगञ्जविश्वविद्यालयः,
पश्चिमबङ्गः

असद्भूत्वा वेति शङ्कासमाधाने स्वनैपुण्यं प्रतिस्थापनाय भर्तृहरिणा बहुधा व्यरचि। अतोऽवसरोऽयं तन्मतमनुचिन्त्य शङ्कासमाधाने।

**Literature Survey**-शोधपत्रस्य विषयो भवति भर्तृहर्य्यनुसारं अङ्कुरो जायते इत्यत्र जायतेक्रियायाः कर्तृत्वविवेचनम्। कारकतत्त्वविषये पूर्वेऽपि अनेकविधा गरिमापूर्णा आलोचना दरीदृश्यन्ते भारतवर्षे। तेषु कतिपयानि शोधकार्याणि यथा- "पाणिनीय व्याकरण के सन्दर्भ मै कारकसम्बन्धोद्ययत् एक अनुशीलन"- Maharaja Ganga Singh University, 2009. "A critical and comparative study of the Sadhana in Sanskrit Grammer with special reference to Sadhana Samuddesa of vakyapadiya"-Punjub University-1981. "लघुशब्देन्दुशेखर-प्रक्रियासर्वस्व-लघुपाणिनीय-वाक्यपदीयाद्याधारेण कारकाणां समीक्षात्मकमध्ययनम्"- Mahatma Gandhi University-2011.

**Objective** - विवक्षावशात् शब्दमात्रगम्यमाने कर्तृत्वे स्वीकृते वस्तुसत्तमतिक्रम्य अविद्यमाने वस्तुन्यपि कर्तृत्वं जायते इति विषये भर्तृहरिदिशा पर्यालोचनमस्य शोधपत्रस्य मुख्योद्देश्यं वर्तते।

**Main Content and Analysis-**

➢ **बुद्धिदिशा कर्तृत्वविमर्शः**- बुद्धिमाहात्म्ये न केवलं विद्यमानस्यैव कर्तृत्व स्यात्परन्तु अविद्यमानस्यैव कर्तृत्वमारोपितम्। यथा- देवदत्तो गच्छति। अत्र कर्तुर्देवदत्तस्य उपस्थितिर्दृश्यते। अपि चाङ्कुरो जायतेऽत्र अङ्कुरोऽविद्यमानोऽपि कर्तृत्वमाश्रयति। परन्तु वस्तुसत्तामङ्गीकृत्य अङ्कुरस्य कर्तृत्वं नोपजायते। अङ्कुरः सद्रूपेण जनिक्रियायां कर्ता भवति चेत्तदा धात्वर्थेन सह वैषम्यं दृश्यते। यतोहि सतो वस्तुनः पुनो जायतेक्रियासम्बन्धो नास्ति। पुनश्च अङ्कुरस्यासत्त्वेऽपि क्रियासम्बन्धं नास्ति। क्रियासम्बन्धाभावे कर्तृत्वमपि नास्ति। कर्तृत्वाभावे ल-कारस्य प्रयोगाभावो विद्यते। अत्र तात्पर्यं विद्यते यथा- जनिक्रियोत्पत्तिश्चेदङ्कुरस्य असत्तायां भवति तर्हि अङ्कुरः कर्ता न भवति। यतोहि असत उत्पत्तिः कदापि न सम्भवति बन्ध्यापुत्रवद् अलीकत्वादिति निर्वदति रघुनाथशर्मा-"असत उत्पत्त्यभ्युपगमे बन्ध्यापुत्रादेरलीकस्य अप्युत्पत्तिप्रसङ्गात्"[1] इति। यदि वा सद्रूपत्वे भवति तथापि क्रियया सह तस्य कोऽपि सम्बन्धो नास्ति सत्तायां जनिक्रियाभावात्। अतो बाह्यवस्तुसमाश्रयेण कर्तृत्वमुपगम्ये सदसत्पक्षे समस्येयं वर्तते इति हेलाराजाः परिजह्रुर्यथा-"यदि सज्जायते कस्मादथासज्जायते कथमित्यादिना पूर्वं वास्तवरूपासमाश्रयेण सदसत्पक्षभेदेनापि जनिकर्तृत्वमयुक्तम्"[2] इति। वाक्यपदीये सम्बन्धसमुद्देशे उपचारसत्तास्वीकारेण अस्याः समस्यायाः समाधानं वर्तते। परन्तु पदकाण्डे साधनसमुद्देशे उपचारसत्ताम् अतिक्रम्य बुद्ध्यवस्थासमाश्रयेण भर्तृहरिणा कारिकेयं प्रासेधि-

**उत्पत्तेः प्रागसद्भावो बुद्ध्यवस्थानिबन्धनः।**
**अविशिष्टः सताऽन्येन कर्ता भवति जन्मनः॥**[3]

कारिकायां "बुद्ध्यवस्थानिबन्धनः" इति शब्दस्यार्थो भवति बुद्धेरवस्थाविशेषेण प्रयुक्तः। विवक्षारूपा बुद्धिर्हि शब्दप्रयोगस्य हेतुर्भवति। अतो बुद्धिरेव शब्दनिमित्ता। तत् शब्दनिमित्तभूतं बुद्धेरवस्थाविशेषं समाश्रित्य उत्पत्तेः प्रागसतोऽङ्कुरस्यापि जनिक्रियाकर्तृत्वं व्यपदिश्यते। कारिकायाम् "अन्येन" इति शब्दस्यार्थो भवति कर्त्रन्तराणां सादृश्ययुक्तम्। अर्थाद्देवदत्तादिभिः कर्त्रन्तरैस्तुल्यम्। यथा देवदत्तः सद्भूत्वा गमनादिक्रियायां कर्ता भवति तथा बुद्ध्यवस्थां प्राप्य अङ्कुरोऽपि जनिक्रियायां कर्ता भवतीति हेलाराजो वाक्यपदीये प्रकीर्णप्रकाशे निरणेष्ट-"तथा हि विवक्षारूपाया बुद्धेः शब्दनिमित्ताया येऽवस्थाविशेषाः प्रतिनियत-शब्दनिबन्धनाः, तदाश्रयेणात्र क्रियान्तरकर्तृत्वतुल्यं जनिकर्तृत्वं सिद्धम्"[4] इति। रघुनाथशर्मणा अपि प्राणायि यत्-"विवक्षारूपायाः विवक्षाकारेण परिणताया बुद्धेः शब्दे निमित्तभूताया येऽवस्थाविशेषा विवक्षाविशेषरूपाः प्रतिनियतशब्दनिमित्तभूताः प्रतिशब्दं नियतास्त-दाश्रयेण तत्सत्ताश्रयेण अङ्कुरो जायते इत्यत्र गमनादिक्रिया-कर्तृत्वतुल्यं जनिकर्तृत्वं सिद्धम्"[5] इति। बहिर्जगति अङ्कुरोऽसदपि बुद्धावेव निहितोऽस्ति। अर्थादङ्कुर उत्पत्तेः प्राग् बुद्धौ सद्रूपेण तिष्ठति। यदा तु वक्तुस्तद्विषये विवक्षा जायते तदा अङ्कुरशब्दस्य प्रयोगो भविष्यतीति हेलाराजोऽवादीत्- "विवक्षाप्रापितसन्निधाने ह्यर्थेऽङ्कुर इति शब्दः प्रयुज्यते। स च सदेव वस्तु दर्शयति"[6] इति। हेलाराजस्याभिमतं परिचिन्तयता रघुनाथशर्मणा अपि समुपागामि यत्-"बहिरसत्यपि विवक्षाप्रापित-सन्निधाने ह्यर्थेऽङ्कुर इति शब्दः प्रयुज्यते। स चोत्पत्तेः प्राग् बुद्धिः सदेव दर्शयति"[7] इति। पुनः शङ्का जायते यद् अङ्कुरो जायते इति वाक्ये जायते-पदस्य समभिहारेण कथं सद्रूपस्याङ्कुरस्य सत्त्वम्। तत्र प्रत्यभाषद्यत्- जायतेक्रिया-सिद्ध्यर्थं बुद्धावेव प्रतिभासमान-स्याङ्कुरस्य शब्दप्रयोगनैपुण्येन बहिर्जगति आत्मलाभाख्यो जन्म भवति। अनन्तरं जायतेक्रिया-सिद्धिरिति मत्त्वा अङ्कुरो जायते इति वाक्यस्य प्रयोगो दृश्यते इति। तथाच हेलाराजो निर्वक्ति-"ततो जायते इति पदसमवधाना-वधारितजन्मनोऽस्य कुतः सत्तमिति बुद्ध्या निश्चितसत्त्वस्य क्रियासिद्धावुपगृहीतसामर्थ्यस्य बाह्येन रूपेण जन्मेति वाक्यार्थोऽ-वतिष्ठते"[8] इति। अतोऽत्र अङ्कुरस्य अवस्थाद्वयम्। वासनारूपेण बुद्धावभासमानमित्येका। अपरा च शब्दवृत्तमाश्रित्य बाह्यरूपा। अतोऽङ्कुरो जायते इति वाक्ये येन रूपेण बुद्धावेव अङ्कुरस्य सत्त्वं दृश्यते न तेन रूपेण बहिर्जगति कर्तृत्वम्। अर्थाद्बुद्धावेव अङ्कुरो प्रतिभासमानतया सदेव भवति। अतस्तेन न कर्तृत्वम्। परन्तु शब्दवृत्तमाश्रित्य बाह्येन प्रयोगरूपेण कर्तृत्वमुपजायतेऽङ्कुरादेरिति हेलाराजः प्रचचक्षे-"ततश्च येन रूपेण सत्त्वं न तेन कर्तृत्वम्"[9] इति। रघुनाथशर्माऽपि वावद्यते यत्-"ततश्च येन रूपेण उत्पत्तेः प्राग् अङ्कुरादेः सत्त्वं वासनारूपेण बुद्धौ सत्त्वम्, न तेन कर्तृत्त्वम्, किन्तु अङ्कुरत्वादिना बाह्येन रूपेण कर्तृत्वम्"[10] इति। तद्विपरीते तु येन रूपेण कर्तृत्वं सिद्ध्यति अङ्कुरस्य न तेन रूपेण सत्त्वमिति सिद्धान्तः। तदुक्तं हेलाराजेन-"येन च कर्तृत्वम्, न तेन सत्त्वमिति"[11] इति। एवमेव कारणात् पृथक् कार्यमिति वक्तव्मनुचिन्त्य कार्यमुखेन कर्तृत्वं जन्म च सद्रूपेणासद्रूपेण नोत्पद्येते इति कृत्वा बुद्ध्यवस्थाऽङ्गीकृता भर्तृहरिणा। न्यायसूत्रस्य खद्योतभाष्ये गङ्गानाथझा प्रणिजगाद- "कार्यमसत् प्रागभावप्रतियोगि बुद्धिसिद्धं बुद्धिविषयीकृतम्"[12]इति।

अतो व्याकरणे शब्दार्थ एव विषयो न वस्तुकृतोऽर्थ इति नियमानुसारं अङ्कुरस्य कर्तृत्वं न वस्तुकृतमपि तु शब्दादेव इति हेलाराजेन निरमायि- "नेयं वास्तवी व्यवस्था अपि तु शाब्द्येव"[13] इति। हेलाराजस्य वक्तव्यं व्यनुनादयता रघुनाथशर्मणा अपि

अन्वमानि यत्-"नेयम् अङ्कुरादेर्वास्तवी वस्तुकृता कर्तृत्वव्यवस्था अपि तु शाब्द्येव शब्दकृतैव"[14] इति। अत एव सर्वत्रापि शब्दनिमित्तत्वात् प्रयोगे निर्बाधमानतया मुख्यकर्तृत्वव्यवस्था एव सर्वदा। न त्वत्र उपचारसत्ता क्वापीति प्रदर्शयन् हेलाराजो पापठ्यते-"शब्दार्थ एव चार्थ इत्यस्खलद्वृत्तित्वात् प्रयोगस्य मुख्यतैव सर्वत्र, नोपचारार्थः कश्चित्"[15] इति। अयं भावो बाह्यव्यवहारस्य बुद्धिग्राह्यत्वादङ्कुरो जायते इति प्रयोगे अङ्कुरस्य मुख्यकर्तृत्वं सर्वदा निर्बाधतया प्रयुज्यते। अत उत्पत्तेः प्रागेव बहिरसतोऽपि अङ्कुरस्य बुद्धावेव वासनारूपेण स्थितत्वात् प्रयोगस्य मुख्यतैव सर्वत्र नाध्यारोपादुपचार इति। अतो रघुनाथशर्मा व्यरचि-"तत्र वैवक्षिके कर्तृत्वे उत्पत्तेः प्राग् बहिरसतोऽप्यङ्कुरादेर्वासनारूपेण बुद्धौ सत्त्वादुपचारार्थोऽपि न कश्चिदित्युच्यतेऽत्र"[16] इति। भर्तृहरेराशयोऽनुबन्धयता रामयत्नशुक्लेन वैयाकरणसिद्धान्तभूषणे प्रण्यगादि यथा-"उत्पत्तेः प्राग्वस्तुसता अन्येन कर्त्रा गमनादि क्रियाकर्त्रा देवदत्तादिना सममविशिष्टः तुल्यो भवति। तथा च वैविक्षिके कर्तृत्वादौ उत्पत्तेः प्राग्बहिरसतोऽपि अङ्कुरादेः वासनारूपेण बुद्धौ सत्त्वात् जायत इति व्यवहारः"[17] इति।

➢ **वस्तुदिशा कर्तृत्वविमर्शः**- पूर्वकारिकायां कार्यमुखेन कर्तृव्यवस्था जन्मव्यवस्था च न सदसद्रूपेणोपजायेते। अतस्तत्र बुद्धिकृता व्यवस्थाऽऽद्रिता। परन्तु अधुना कारणमुखेन च कर्तृव्यवस्था प्रतिपादिता। तथा च भर्तृहरिर्न्यगदीद्यथा-

**कारणं कार्यभावेन यथा वा व्यवतिष्ठते।**
**कार्यशब्दं तथा लब्धा कार्यत्वेनाथ जायते॥**[18]

यथा बुद्ध्यवस्थासमाश्रयेण अङ्कुरादेर्जनिक्रियायां कर्तृत्वं सिद्धं तथा च वस्तुसत्तास्वीकारेऽपि अङ्कुरादेः कर्तृत्वं प्रतिपद्यते इति कारिकाया निगूढार्थः। तद्यथा हेलाराजेन निरमायि-"कार्यमुखेन कर्तृता जन्म च सदसत्पक्षभेदेन नोपपद्यत इति बुद्ध्यवस्थासमाश्रयेण पूर्वमुपपादितम्। इदानीं कारणमुखेन प्रतिपाद्यते"[19] इति। अर्थाद् अङ्कुरादेः कर्तृत्वविचारे पक्षद्वयमस्ति। कार्यमुखेन इत्येकः। कारणमुखेन इत्यपरश्च। अतः कारिकायां वा-इति शब्दः कारणमुखापेक्षी इति वदता रघुनाथशर्मणा पर्यपोषि यत्-"अत एव पक्षान्तरसूचकः पक्षान्तरमादाय समाधानान्तरसूचकः कारिकायां वा-शब्दः"[20] इति। यद्यपि कारणात्पृथग्भवति कार्यमिति न्यायमतमस्ति तथापि अत्र कारणमुखपक्षे परिणामवादो हेतुर्भवति। सांख्याचार्याः परिणामवादिनः। परिणामवादिनये कार्यकारणयोरभेदः सूचित इति हेलाराजेन न्यवादि-"परिणामदर्शने त्वभेदपक्ष इदं कथ्यते"[21] इति। अर्थात् कारणादभिन्नं कार्यम्। कारणं सत् कार्यमपि सत्। कारणमेव कार्यस्य प्रकृतिस्तुल्यम्। कार्यन्तु कारणस्य प्रकृतेर्वा विकृतिरूपम्। अतस्तयोः प्रकृतिविकृतिभावो युज्यते। यथा क्षीरं दधि सम्पद्यते। अत्र क्षीरं भवति दध्नः कारणम्। दधि एव क्षीरस्य विकारः। यतोहि क्षीरमेव दधिरूपतया परिणमय्यते। एवं बीजमङ्कुरो जायतेऽत्रापि। अतः कार्यकारणयोस्तु अभेदव्यवहारेणैकस्यावस्थाविशेषस्य अवस्थान्तरविशेषस्वीकरणं भवति। तदेव जन्म इत्याख्यायते। अर्थात् कारणरूपः पूर्वावस्थाविशेषः कार्यरूपोत्तरावस्थान्तरविशेषे रूपान्तरतीति कार्यकारणयोरभेद इति न्यवेदयद् हेलाराजः-"कार्यकारणयोः प्रकृतिविकाररूपतया "क्षीरं दधि सम्पद्यते" "बीजमङ्कुरो जायते" इत्यभेदेन व्यवहारादेकस्यावस्थातुर-वस्थाविशेषस्वीकरणमात्रं(जन्म) सतत्त्वम्"[22] इति। हेलाराजस्य आशयमनुचिन्त्य रघुनाथशर्माऽपि समनिन्ये यत्-"कार्यकारणयोः प्रकृतिविकाररूपतया 'क्षीरं दधि सम्पद्यते, बीजमङ्कुरो जायते' इत्यभेदेन व्यवहाराद् एकस्यावस्थातुरवस्थाविशेषस्वीकरणमात्रं जन्म सत्त्वमिति"[23] इति। तदेव कारणं सर्वदा कार्योन्मुखापेक्षि। अत उत्तरावस्थायां कार्यरूपविशिष्टविकारं प्राप्नोति। सा एव विकारावस्था जन्म कथ्यते इति हेलाराजो व्यनैषीत्-"कार्योन्मुखताया विशिष्टविकाराभिनिर्वृत्तिप्रक्रमे विशिष्टोत्तरावस्था जन्म"[24] इति। यथा बीजमङ्कुरो जायतेऽत्र बीजं कारणम्। कार्यं भवति अङ्कुरः। कार्यकारणयोरभेदपक्षे अङ्कुरमुखापेक्षि बीजमेव उत्तरावस्थायाम् अङ्कुररूपविशिष्टविकारं प्राप्नोति। तदेवाङ्कुरस्य जन्म इति समवेक्ष्य हेलाराज आचख्यौ-"विशेषगतवाचकाध्यासात् कारणमेव सद्रूपं कर्तृभवदुवत्तरावस्थासाधनलक्षणं जन्म प्रतिपद्यत इति युज्यते जायतेऽङ्कुर इति प्रयोग"[25] इति। एवमेव बीजादभिन्नोऽङ्कुर इति सिद्धान्तः। अतोऽङ्कुरादिकार्यस्य बीजादिरूपे कारणे अध्यासेना-भेदारोपो भवति। अनेन अभेदारोपेण सद्रूपं बीजादिरूपं कारणमुत्तरावस्थायां जन्मादिक्रियासाधनरूपम् अङ्कुरत्वेन कर्ता भवतीति रघुनाथशर्मा प्रण्यगादीत्-"अङ्कुरादिरसावस्थाविशेषगतस्य अङ्कुरादिपदरूपस्य वाचकस्य बीजादिरूपेऽवस्थातरि अध्यासा-दध्यारोपाद्बीजादिरूपं कारणमेव सद्रूपं कर्त्तृभवद् उत्तरावस्था-साधनरूपं जन्म प्रतिपद्यतेति युज्यते जायतेऽङ्कुर इति प्रयोग"[26] इति। अत्र भर्तृहरेराशयं प्रतिज्ञापयन् रामयत्नशुक्लो वैयाकरण-सिद्धान्तभूषणे प्रण्यगादीद्यथा-"कस्यापि वस्तुनः कार्यरूपेण कर्तृत्वं जन्म च सदसत्पक्षभेदेन कार्यस्य जन्मनः प्राग् असत्त्वमिति, तस्य ततः प्रागसत्त्वमिति पक्षभेदेन नोपपद्यतेति कृत्वा बुद्ध्यवस्थासमाश्र-येण बुद्धौ वासनारूपेण अङ्कुरादेः सत्त्वसमाश्रयेण पूर्वमङ्कुरादेः कर्तृत्वं प्रतिपाद्यते"[27] इति।

कार्यकारणयोरभेदोऽयमुपचारसत्तया स्वीकृतो भवति। तद्यथा भर्तृहरिणा न्यबन्धि -

**यथा तदर्थैर्व्यापारैः क्रियात्मा व्यपदिश्यते।**
**अभेदग्रहणादेष कार्यकारणयोः क्रमः॥**[28]

कारिकायां तदर्थशब्दस्यार्थो भवति प्रधानक्रियार्थः। प्रधानक्रियासिद्ध्यर्थं गुणीभूतव्यापारा अत्र व्यापारैरिति शब्देनोच्यते। क्रियात्मा नाम प्रधानक्रियारूपम्। अभेदग्रहणं नाम प्रधानाप्रधानभेदाभावः। अर्थात्फलार्थं मुख्येन सह गौणव्यापाराणां नास्ति कोऽपि भेदः। अतो मुख्यफलाय यथा प्रधानाङ्गव्यापाराणाञ्चाभेदोऽस्ति अध्यारोपाध्यासेन तद्वत्कार्यकारणयोः क्रमे अभेदोऽपि अध्यारोपेण सिद्ध्यतीति कारिकाया आशयः। अत्र हेलाराजेनोदाहारि यथा पच् धात्वर्थो विक्लित्तिः। परन्तु रामः पचति वाक्येऽस्मिन् न तु रामस्य विक्लित्तिरवगम्यते। अपि तु इदमेव वक्तुं शक्नोमि यद् रामो गुणीभूतस्याधिश्रयणादेर्व्यापाराणां सम्पादनाकार्यं कृतवान्। काष्ठान्यपि ज्वलन- व्यापारे सहकारीणीति व्यज्ञायि हेलाराजेन-

"अधिश्रयणोदकासेचनतण्डुलावपनै- धोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः, काष्ठानि पचन्ति आविक्लित्तेर्ज्वलन्तीति करणस्य पाक इत्यादिना"[29] इति। व्यापारसमुदायैर्विक्लित्तिः सम्पद्यते। मूलतो विक्लित्तिः कार्यम्। कारणं भवति अधिश्रयणज्वलनादिकमिति प्रकीर्णप्रकाशे हेलाराजेन समपादि-"पचेर्विक्लित्तिः प्रधानार्थ इति तदर्थैः गुणव्यापारैरधिश्रयणोदकासेचनादिभिः कर्त्रादिगतैस्तादर्थ्या-दभेदमध्यारोप्य प्रधानक्रियारूपमुच्यते"[30] इति। परन्तु उभयोरभेदकल्पनावशाद् रामः पचति सिद्धोऽयं प्रयोगः। अभेदोऽयं न वास्तवः, परन्तु उपचारमूलकः। यतोहि कार्यार्थाय फलाय वा कारणसमूहाणां क्रमो भिन्नोऽपि अध्यारोपेणोपचारवशाद्वा अभेदतया दृश्यते इति। व्याजहार हेलाराजो यथा-"तथा कार्यार्थत्वात्कारण-स्यैवैषानुपूर्वी क्रमोऽभेदेन व्यवहारे"[31] इति। तथैव अङ्कुरो जायते इत्यादौ अपि भवति। अङ्कुरो यद्यपि कार्यमेव तथापि शब्दसामर्थ्यादुपचारप्रयोगेन अङ्कुरस्य कारणत्वमुपन्यस्तम्। कारणस्य आदौ सत्त्वाद्विद्यमानत्वाद्वा जायते क्रियायाः कर्तृत्वं सिद्धम्। न क्वापि बाधा दृश्यते। विषयेऽस्मिन् हेलाराजेन प्रत्यपादि यत्- "तथा च कारणमेवाङ्कुरशब्दाभिधेयं सत्कर्तृ कार्यात्मना जायत"[32] इति। रघुनाथशर्मा अपि प्रतिजगाद यत्-"तथा च कारणमेवाङ्कुर-शब्दाभिधेयं सदत्र कर्तृ तदेव च कार्यरूपेण जायतेति युज्यते अङ्कुरो जायते इति व्यपदेष्टुम्"[33] इति। तस्माद्विविधोऽयं कार्यकारण-योरभेदः।सत्कार्यानुयायिना वास्तवोऽभेद इत्येकः। अपरश्चाध्या-रोपाध्यासेन उपचारमूलक इति हेलाराजीयसिद्धान्तः।

➢ **विवर्तवाददिशाकर्तृत्वविमर्शः**पूर्वोऽनुच्छेदे कारणादभिन्नं कार्यमिति प्रमाणितम्। अधुना उदाहरणमुखेन तदभेदत्वं प्रमाणयितुं हरिणा विवर्तवादोऽङ्गीकृत्य समुधृतेयं कारिका-

**यथाऽहेः कुण्डलीभावो व्यग्राणां च समग्रता।**
**तथैव जन्मरूपत्वं सतामेके प्रचक्षते॥**[34]

कारिकायामेके इति शब्देन अद्वैतवादोऽभ्युपगम्यते। ते चाद्वैतवादिनो विवर्तवादपक्षम् अनुसरन्ति। विवर्तवादानुसारं वस्तु भवति ब्रह्मणो विवर्तमात्रम्। न तु ब्रह्मणोऽत्यन्तं भिन्नम्। तद्वत्सर्पस्य कुण्डली सर्प एव न तु अन्या। अतस्तयोरभिन्नत्वं दृश्यते। यथा वा व्यस्तानामङ्गुल्यादीनां संघातो मुष्टिरिति कथ्यते न तु तत्र कश्चिदपि भेदो दृश्यते। तथैव कारणादभिन्नं कार्यम्। कारणस्य अवस्थान्तरप्राप्तिरेव जन्म इति आशयः। अत उत्पत्तेः प्रागेव बीजरूपात्कारणाद् अङ्कुरादीनां जन्मना निरूप्यमानतया तदभेद-त्वमेव व्यपदिश्यते। तदा अवस्थान्तररूपतया अङ्कुरादीनां जनिक्रियायां कर्तृत्वसिद्धिः। न्यरूपि हेलाराजेन- "सर्पस्य कौटिल्य-मनर्थान्तरम्, पृथग्भूतानां चाङ्गुल्यादीनां सङ्घातो मुष्ट्यादि-रित्यवस्थाविशेषमात्रसारः कार्यकारणभाव इत्यवस्थातुः अभेदाद् अवस्थास्वनुगमात् सत्त्वे जनिकर्तृतासिद्धिः"[35] इति। प्रसङ्गेऽस्मिन् रघुनाथशर्मा उपादिक्षत्- "यथाऽहेः कुण्डलीभावः मण्डलारूपतया सन्निवेशोऽहेर्नातिरिच्यते,यथा वा व्यग्राणां व्यस्तानामङ्गुल्यादीनाम्, समग्रता मुष्ट्यादिरूपेण संघातरूपता व्यग्रेभ्यो नास्तिरिच्यते, तथैव जन्मनः प्राक् सतां बीजादीनामङ्कुरादिरूपेण जन्मरूपत्वं जन्मना निरूप्यमाणत्वम्, एके विवर्त्तवादिनोऽद्वैतिनस्तदनुयायिनो वैयाकर-णाश्च प्रचक्षत"[36] इति। रामयत्नशुक्लोऽपि वैयाकरणसिद्धान्तभूषणे प्रणिनाय यथा-"यथा अहेः सर्पस्य कुण्डलीभावः मण्डलरूपतया सन्निवेशोऽहेर्नातिरिच्यते, यथा वा व्यग्राणां व्यस्तानाम् अङ्गुल्यादीनां समग्रता मुष्ट्यादिरूपेण संङ्घातरूपता व्यग्रेभ्यो नातिरिच्यते। तथैव जन्मनः प्राक् सतां वीजानामङ्कुरादिरूपेण जन्मरूपत्वम्, जन्मना निरूप्यमाण-त्वम्"[37]इति।

➢ **जातिदिशा कर्तृत्वविमर्शः-** बुद्ध्यवस्थासमाश्रयेण तथा च वस्तुवृत्तिमाश्रयेण जनिक्रियायामुङ्कुरादेः कर्तृत्वं सिद्धं भवति। अर्थादुत्पत्तेः प्रागेव अङ्कुरस्य असत्त्वादपि बुद्धिनिमित्तेन अवस्थाविशेषेण जनिक्रियाकर्तृत्वं सिद्धम्। पुनश्च कारणाद् अभिन्नमेव कार्यमिति मत्त्वा परिणामवादमङ्गीकृत्य वस्तुवृत्त्याश्रयेणापि अङ्कुरस्य जनिक्रियाकर्तृत्वं सिद्धम्। अधुना न्यायमतमाश्रित्य असत्कार्यवादानुयायिना कार्यकारणयोर्भेदेऽपि कर्तृत्वं साधयितुं भर्तृहरिणा प्रण्यनायि कारिकेयम्-

**विभक्तयोनि यत्कार्यं कारणेभ्यः प्रवर्तते।**
**स्वा जातिर्व्यक्तिरूपेण तस्यापि व्यवतिष्ठते॥**[38]

कार्यकारणयोर्भेस्वीकारेऽपि जनिक्रियाकर्तृत्वं सिद्ध्यति। विभक्त-योनिः शब्दोऽयं बहुव्रीहिसमासेन निष्पन्नो भवति। विभक्ता स्वस्माद्(कारणात्) भिन्ना योनिः कारणं यस्य स विभक्तयोनिरिति हेलाराजेनोदलेखि-"विभक्ता व्यतिरिक्ता योनिः कारणमस्य"[39] इति। रघुनाथशर्माऽपि प्रणिनाय यत्-"विभक्ता स्वस्माद् व्यतिरिक्ता योनिः कारणमस्य"[40] इति। कार्यस्य विशेषणोऽयं शब्दः। अनेन भावो विद्यते यत् कारणाद्भिन्नं कार्यम्। अतो विभक्तयोनिः। उत्पत्तेः प्राक्कार्यमसत्। सतः कारणादुत्पन्नं भवति। परन्तु एतत्तु कारणान्नात्यन्तभिन्नम्। अत उत्पत्तेः प्राक्कार्यं व्यक्तिरूपेण असदपि जातिरूपेण विद्यते इति हेलाराजोऽभ्युदाहार्षीत् - "तस्यासतो विकार्यस्य जायमानस्य कारणेभ्यः सकाशाद्व्यतिरिक्तस्योत्पत्तेः पूर्वं व्यक्तिरूपेणासत्त्वे अपि जात्यात्मना सत्त्वात्"[41] इति। रघुनाथशर्मणाऽपि व्यन्वनादि-"एवासतो विकार्यस्य जायमानस्य कारणेभ्यः सकाशाद् भिन्नस्य उत्पत्तेः पूर्वं व्यक्तिरूपेणासत्त्वेऽपि जात्यात्मना सत्त्वात्"[42] इति। अत्र भावो विद्यते यत्- जातिरेव स्वाभिव्यञ्जकां व्यक्तिं निष्पन्नार्थं साधनानि नियोगं कृत्वा व्यक्तिरुपेण निष्पद्यते। तदा सा व्यक्तिरूपेण कार्यमित्याख्यायते इति हेलाराजेन समपादि-"साधनविनियो-गाज्जातिरेव कारणानां स्वाभिव्यञ्जकसम्पत्त्यर्थं प्रयोजिकेति सैव व्यक्त्यात्मना जायत"[43] इति। हेलाराजस्य आशयमनुचिन्त्य रघुनाथशर्मणा न्यबन्धि यत्-"तज्जातीयतया बुद्धौ निरूप्य प्रयोक्त्रा साधनविनियोगात् कर्त्तृत्वेनाङ्कुरादेः विनियोगाज्जातिरेव स्वाभि-व्यञ्जकव्यक्तिसंपत्त्यर्थं कारणानां प्रयोजकेति सैव व्यक्त्यात्मना जायत"[44] इति। अर्थाज्जातिरूपं कारणं व्यक्तिरूपेण कार्यं भविष्यति। जातिः सर्वथा नित्या एव। तस्या एव अस्तित्वं बुद्ध्या सम्पादितम्। अनेन नित्यजातिव्यवहारेण अङ्कुरादीनां पदार्थानां कर्तृत्वं जायते इति प्रकीर्णप्रकाशे नयनगोचरी भवति यथा-"व्यवहाराज्जातिरूपेण कर्तृत्वम्, व्यक्तिरूपेण जन्यत्वमिति"[45] इति। रघुनाथशर्माऽपि वभाषे-"व्यवहारज्जातिरूपेण कर्त्तृत्वं व्यक्तिरूपेण जन्यत्वमिति"[46] इति। जातिव्यक्त्योः समानाधिकरण्यवशात्तयोरत्यन्ता- योगो नास्ति।

तस्माज्जातिरूपोऽङ्कुरो व्यक्तिरूपोऽङ्कुरादभिन्नः। अभिन्नत्वे सति तयो अत्यन्तायोगो नास्तीति निरटङ्कि हेलाराजेन यथा-"अत्यन्तं व्यतिरेकाभावाद् जातिव्यक्त्योः सामानाधिकरण्यादुपपद्यत"[47] इति। रघुनाथशर्मणाऽपि प्रादर्शि यथा - "जातिव्यक्त्योः सामानाधिकरण्याद्भेदाभेदरूपात् तयोरत्यन्तं व्यतिरेकाभावात् कार्यकारणयोर्भेदवादेऽपि उत्पत्तेः प्राक् सतोऽप्यङ्कुरादेर्जातिरूपेण कर्तृत्वं स्वरूपेण च जन्यत्वमुपपद्यत"[48] इति। अतः कार्यकारणयोर्भेदस्वीकारेऽपि उत्पत्तेः प्राग् जातिरूपेण विद्यमानत्वादङ्कुरादीनां कर्तृत्वमुपपन्नम्।

**Finding and Outcome** - आदावङ्कुरस्य कर्तृत्वविषये न्यायवैशेषिकदर्शनैः सह सांख्यानां तथा च अद्वैतवादीनामपि पन्थानं भर्तृहरिः पर्यालोचते। तत्र कर्तृत्वप्रतिस्थापेन तेषां सर्वेषां वादीनां स्वनैपुण्यमस्ति। अतस्तेषां मतं पर्यालोच्य भर्तृहरिणाऽङ्कुरस्य कर्तृत्वप्रतिपादने वैयाकरणानां सिद्धान्तः प्रादर्शि। अत्र सिद्धान्तो वर्तते यच्छब्दात्प्रतीयमानोऽर्थ एव विषयो न शब्दातिरिक्तो बाह्यार्थः। अतः स्वसिद्धान्तं प्रमाणयितुं हरिणा प्राणायि यत्-

**भावेष्वेव पदन्यासः प्रज्ञाया वाच एव वा।**
**नास्तीत्यप्यपदे नास्ति न चासाद्भिद्यते ततः॥**[49]

कारिकायां प्रज्ञा इति शब्दस्यार्थो भवति ज्ञानम्। अत्र ज्ञानन्तु बुद्धिः। वाच इति शब्दस्यार्थो भवति शब्दार्थः। पदन्यासो नाम विषयीकरणम्। भाव इति भावपदार्थः। तेषु भावपदार्थेषु इत्यर्थः। अपदे इति अविषये अवस्तुनि वा। कारिकास्थितेन तत-इति पदेन तस्मादित्यर्थोऽभ्युपगम्यते। अर्थात्सत्पदार्थेभ्यः। अतः प्रज्ञानस्य शब्दस्य च सर्वदा भावपदार्थेषु प्रवृत्तिर्विषयीकरणं वा भवति। यतोहि ज्ञानशब्दयोः प्रवृत्तिः अवलम्बनरहिता न भवतीति हेलाराजो निर्वदति-"आकारावग्रहणेन ज्ञानशब्दयोः प्रवृत्तेर्निरालम्बनताऽयोगात् प्रतीयमान"[50] इति। तन्मतं रघुनाथशर्माऽपि आश्रुणोति-"शब्दप्रत्ययौ आकारावग्रहणेन शब्दात्प्रतीयमानमाकारं गृहीत्वा प्रवर्तततेति तयोः निरालम्बनत्वायोगात् निराकारत्वायोगात्"[51] इति। अतः शब्दाद्विवेच्यमानमाकारं गृहीत्वैव तयोर्विषयीकरणं जायते। शब्दाद्विवेच्यमानं तदाकारं सर्वदा भावपदार्थानुयायि भवतीति हेतोर्ज्ञानशब्दयोः प्रवृत्तिः केवलं भावपदार्थेषु वर्तते इति हेलाराजेन व्यरचि-"भावशब्दवाच्यः सदैव विषयः पदविन्यासस्थानं तयोः"[52] इति। तद्वन्नास्तीति प्रयोगोऽपि असति अवस्तुनि न भवति। अर्थाद् आकाशकुसुमशशशृङ्गादीनामभावोऽपि तान् शब्दान् अधिकृत्यैव वर्तते। अत्र कारणं भवति वक्तुः परिकल्पना उत्प्रेक्षणं वा। न तु शब्दातिरिक्तं किञ्चिदन्यमधिकृत्येति वदति हेलाराजो यथा-"नास्तीत्यभावालम्बनौ कञ्चन परपरिकल्पितं स्वयमुत्प्रेक्षितं वाकारमवलम्ब्य जायते"[53] इति। रघुनाथशर्माऽपि वावक्ति यत्-"नास्तीति अभावालम्बनावपि शब्दप्रत्ययौ कञ्चन् परपरिकल्पितं केवलाधारादिरूपं स्वयमुत्प्रेक्षितं वाऽऽकारमवलम्ब्य जायते"[54] इति। अतः सर्वत्र शब्दाकारेण प्रतिपादनत्वादसत्पदार्थः सत्पदार्थेभ्यो न भिद्यते इति। आकारग्रहणसाम्यात् सदसद्वस्तुमात्रं तुल्यरूपम्। अर्थाद् आकारं विना प्रवृत्तेरसम्भवात् सद्वस्तु यथा आकारं गृहीत्वैव प्रवर्तते तथा असद्वस्तु अपि परिकल्पितमाकारं गृहीत्वैव सद्वस्तुवत्प्रवर्तते इति सामञ्जस्यमिति समभिसन्धाय हेलाराजेन अन्वबन्धि यत्-"स्वाकारावग्रहसाम्यादिति व्यवहारे सर्वमेव भावाभावजातं समानम्"[55] इति। हेलाराजस्य मन्तव्यमनुज्ञापयन् रघुनाथशर्मा विववार-" स्वाकारावग्रहसाम्यात् स्वस्य शब्दस्य प्रत्ययस्य वा य आकारो भावरूपोऽभावरूपो वा परपरिकल्पितः स्वयमुत्प्रक्षितो वा तदवग्रहसाम्यात्तद्ग्रहणसाम्यादिति शाब्दे व्यवहारे सर्वमेव भावाभावजातं समानम् शब्दाकाररूपेण ज्ञानाकाररूपेण वा उभयोरपि सत्त्वात् भावरूपत्वात्"[56] इति। बाह्यवस्तुनोऽस्तित्वं न शब्दशास्त्रे काम्यम्। परन्तु तदाकारमेव। यतोहि शब्दात्प्रतीयमानाकारे एव व्यवहारस्य समाप्तिर्जायते। तस्मात् जायतेऽङ्कुर इत्यत्रापि उत्पत्तेः प्रागेव बुद्धौ वासनारूपेण स्थितत्वाच्छब्दाकारेण प्रतीयमानत्वाद्वा अङ्कुरस्य सत्त्वे जनिक्रियाकर्तृत्वं समुपजायते इति हेलाराजस्याशयो यथा-"बहिर्वस्तुचर्चा तु नाङ्गम्, इयतैव व्यवहारपरिसमाप्तेरिति सदाकारवग्रहप्रवृत्तौ जायतेऽङ्कुरः इति प्रयोगः सूपपाद"[57] इति। तस्माद्बुद्धिशब्दविषयो भवति भावपदार्थः। तद्व्यतिरेकेण वस्तूनां बाह्यसत्ता नास्ति। अतो बुद्धिशब्दावेव पदार्थानां स्वरूपनिर्धारणे उपायौ। न तु केनापि अन्योपायेन इति भर्तृहरिर्ववाशे- .

**बुद्धिशब्दौ प्रवर्तेते यथा भूतेषु वस्तुषु।**
**तेषामन्येन तत्त्वेन व्यवहारो न विद्यते॥**[58]

अत्र बुद्धिशब्दौ च भूतवस्तुषु प्रवर्तेते। अर्थाद्भूतवस्तूनां रूपं तावधिकृत्यैव वर्तते। न तावतिक्रम्य बाह्यपदार्थमाश्रित्य वा। अयं भावो यद्व्यवहारः सर्वदा बुद्धिप्रत्ययेन शब्दाभिधानेन च निष्पद्यते इत्युक्तम्-"अभिधानप्रत्ययावेव व्यवहारः"[59] इति। अतो बुद्धिमनुसृत्य शब्दाभिधानमनुसृत्य वा पदार्थानां तत्त्वानुसन्धानं कर्तव्यम्। अन्यथा व्यवहारकार्ये जटिलता दृश्यते। हेतोर्बुद्धिविरोधेन शब्दविरोधेन वा पदार्थानामण्वेषणम् अयुक्तमिति हेलाराजेन निरमायि-"यथाप्रत्ययं यथाभिधानं च पदार्थतत्त्वमेषणीयम्, नान्यत् पदार्थस्वरूपमप्रतीयमानमनभिधीयमानं चाश्रित्य प्रत्यवस्थेयम्"[60] इति। एवञ्च बुद्धिकृतव्यवहारमाश्रित्य जनिकर्ता प्रतीयते। यतोहि बुद्धिः पदार्थावभासरहिता सती निरालम्बनरूपतया न तिष्ठति। अतो बुद्धौ सर्वपदार्था वासनारूपेण प्रतिभासिताः सन्ति। अनन्तरं शब्दार्थेनाभिधीयन्ते। अर्थादादौ बुद्ध्या उपलब्धिस्तदनन्तरमुपयुक्तः शब्दप्रयोगः। तद्यथा हेलाराजो व्यनैषीद्यत्-"तथा चार्थोल्लेखरहिताया बुद्धेरयोगात् तत्सिद्धेन तत्त्वेन जायमानः कर्ता, निरूपितश्चाभिधीयते"[61] इति। तथा च नास्तीति ज्ञाने पदार्था यद्यपि निर्दिष्टदेशकालेषु अविद्यमानाः सन्ति तथापि देशान्तरे कालान्तरे वा अवभासमानाः सन्तः कर्तृप्रत्ययेन अभिधीयन्ते। हेलाराजेन न्यबन्धि यथा-"यथा नास्तीति प्रत्यये बहिरसन्नपि पदार्थो नियतदेशकालयोर्निषिध्यमानो देशकालान्तरोपल- ब्धेनाकारेणावभासमानः कर्तृप्रत्ययेनाभिधीयते"[62] इति। रघुनाथशर्माऽपि अन्वाचष्टे यत्-"यथा नास्तीति प्रत्यये बहिरसन्नपि पदार्थो नियतदेशनियतकालयोर्निषिध्यमानो देशान्तरकालान्तरोपलब्धेनाकारेणावभासमानः कर्तृप्रत्ययेन तिङाऽभिधीयते"[63] इति। अत्र नास्तीति प्रत्ययाभिधाने हेलाराजेन ज्ञानलक्षणासन्निकर्षोऽङ्ग्यकारीति प्रतिज्ञापयता रघुनाथशर्मणा व्यवृण्वि-"ज्ञानलक्षणाया अनङ्गीकारे अतीतवस्तुस्मृतिद्वारा तज्जातीयतयाऽनुमीयमानं जायत"[64] इति। ज्ञानलक्षणसन्निकर्षानुसारं पूर्वानुभूतविषयो वर्तमानकालिकज्ञानस्य विषयो भवति। तदा

विषयस्य प्रत्यक्षं जायते। यथा सुरभि चन्दनम्। अत्र मन्दिरे आपणे गृहे वा चन्दनं पश्यति मनुष्यः। तदा तस्यैव चन्दनस्य सुगन्धः स्मृतौ भासितः। अनन्तरं यदा तु पुनो दूरस्थिते देशे चन्दनं पश्यति। तदा मनसा पूर्वा स्मृतिरूद्भाविता स्यात्। अनन्तरं सुरभि चन्दनमिति प्रत्ययो जायते। अयमेव ज्ञानलक्षणसन्निकर्ष उच्यते। अत्र पदार्थस्य ज्ञानमेव विषयो भवति न तु साक्षात्पदार्थः। अनेन सन्निकर्षेण वर्तमानविषयोपरि तत्सदृशस्य भूतविषयस्यारोपणं वर्तते। अतो नास्तीति प्रत्ययस्याभिधानमपि ज्ञानलक्षणसन्निकर्षेण प्रतीयमानं भवति। यतोहि नास्तीति प्रत्ययेन वस्तुनोऽभावो विद्यते। तच्च वस्तु कस्मिंश्चित् कालविशेषे देशविशेषे वा यद्यपि अविद्यमानं भवति तथापि कालान्तरे देशान्तरे वा तस्यावस्थितिः परिलक्ष्यते। तदा अवस्थानकाले तेन वस्तुना सह इन्द्रियाणां संयोगे ज्ञानं जायते। अनन्तरं तस्याकारमपि बुद्धौ प्रतिभासमानतया वर्तते। यदा देशविशेषे तस्याभावो विद्यते तदा बुद्धौ प्रतिभासमानमाकारं स्मृतिरूपेण मनसि उद्भवति। अतोऽनेन आकारेण बहिरसत्यपि नास्तीति प्रयोगः कर्तरि तिङ अभिहित इत्याशयः। एवमेव जायतेऽङ्कुर इत्यत्रापि अनागतोऽङ्कुरोऽतीतप्रत्ययेन बुद्धेर्विषयतां प्राप्य सद्रूपेण जनि-क्रियायां कर्ता भवतीति व्यजल्पि हेलाराजेन-"तथा कार्योन्मुख-तायामनागतमपि वस्तु तज्जातीयानुभववासनया बुद्धावभिमुखीभवन् समर्थहेतुवशाज्जायतेति जन्मनः कर्तृत्वेनाभिधीयत"[65] इति।

**संदर्भ ग्रंथा:**

[1] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे अम्बाकर्त्रीटीका कारिका- १०५।

[2] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे प्रकीर्णप्रकाशे कारिका- १०५।

[3] तत्रैव. कारिका-१०५।

[4] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०५।

[5] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०५।

[6] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे प्रकीर्णप्रकाशे कारिका- १०५।

[7] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०५।

[8] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०५।

[9] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०५।

[10] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०५।

[11] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०५।

[12] खद्योत् भाष्यम्- ४ अध्याय।१ आह्निकम्।५० सूत्रम्

[13] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे प्रकीर्णप्रकाशे कारिका- १०५।

[14] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०५।

[15] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०५।

[16] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०५।

[17] वैयाकरणसिद्धान्तभूषणम् कारकार्थनिर्णये निरञ्जनव्याख्या- पृ. ३१२।

[18] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे कारिका- १०६।

[19] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०६।

[20] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०६।

[21] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०६।

[22] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे प्रकीर्णप्रकाशे कारिका- १०६।

[23] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०६।

[24] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०६।

[25] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०६।

[26] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०६।

[27] वैयाकरणसिद्धान्तभूषणम् कारकार्थनिर्णये निरञ्जनीव्याख्या- पृ. ३१२।

[28] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे कारिका- ११३।

[29] तत्रैव. प्रकीर्णप्रकाशे कारिका- ११३।

[30] तत्रैव. प्रकीर्णप्रकाशे कारिका- ११३।

[31] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे प्रकीर्णप्रकाशे कारिका- ११३।

[32] तत्रैव. प्रकीर्णप्रकाशे कारिका- ११३।

[33] तत्रैव. अम्बाकर्त्रीटीका कारिका- ११३।

[34] तत्रैव. कारि.- १०७।

[35] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे प्रकीर्णप्रकाशे कारिका- १०७।

[36] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०७।

[37] वैयाकरणसिद्धान्तभूषणम् कारकार्थनिर्णये निरञ्जनीव्याख्या- पृ. ३१२।

[38] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे कारिका- १०८।

[39] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०८।

[40] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०८।

[41] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०८।

[42] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०८।

[43] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०८।

[44] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे अम्बाकर्त्रीटीका कारिका- १०८।

[45] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०८।

[46] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०८।

[47] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०८।

[48] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०८।

[49] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे कारिका- १०९।

[50] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०९।

[51] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०९।

[52] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०९।

[53] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०९।

[54] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०९।

[55] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे प्रकीर्णप्रकाशे कारिका- १०९।

[56] तत्रैव. अम्बाकर्त्रीटीका कारिका- १०९।

[57] तत्रैव. प्रकीर्णप्रकाशे कारिका- १०९।

[58] तत्रैव. कारिका- ११०।

[59] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे प्रकीर्णप्रकाशे कारिका- ११०।

[60] तत्रैव. प्रकीर्णप्रकाशे कारिका- ११०।

[61] तत्रैव. प्रकीर्णप्रकाशे कारिका- ११०।

[62] तत्रैव. प्रकीर्णप्रकाशे कारिका- ११०।

[63] तत्रैव. अम्बाकर्त्रीटीका कारिका- ११०।

[64] तत्रैव. अम्बाकर्त्रीटीका कारिका- ११०।

[65] वाक्यपदीयं पदकाण्डं साधनसमुद्देशे प्रकीर्णप्रकाशे कारिका- ११०।